श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १६

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १६

*नरनारायणावतारवर्णनं दक्षयागवर्णनं च*

दक्षो विरिञ्चतनयोऽथ मनोस्तनूजां
    लब्ध्वा प्रसूतिमिह षोडश चाप कन्याः।
धर्मे त्रयोदश ददौ पितृषु स्वधां च
    स्वाहां हविर्भुजि सतीं गिरिशे त्वदंशे॥ १ ॥

मूर्तिर्हि धर्मगृहिणी सुषुवे भवन्तं
    नारायणं नरसखं महितानुभावम्।
यज्जन्मनि प्रमुदिताः कृततूर्यघोषाः
    पुष्पोत्करान् प्रववृषुर्नुनुवुः सुरौघाः॥ २ ॥

दैत्यं सहस्रकवचं कवचैः परीतं
    साहस्रवत्सरतपस्समराभिलव्यैः।
पर्यायनिर्मिततपस्समरौ भवन्तौ
    शिष्टैककङ्कटममुं न्यहतां सलीलम्॥ ३ ॥

अन्वाचरन्नुपदिशन्नपि मोक्षधर्मं
    त्वं भ्रातृमान् बदरिकाश्रममध्यवात्सीः।
शक्रोऽथ ते शमतपोबलनिस्सहात्मा
    दिव्याङ्गनापरिवृतं प्रजिघाय मारम्॥ ४ ॥

कामो वसन्तमलयानिलबन्धुशाली
    कान्ताकटाक्षविशिखैर्विकसद्विलासैः।
विध्यन्मुहुर्मुहुरकम्पमुदीक्ष्य च त्वां
    भीतस्त्वयाथ जगदे मृदुहासभाजा॥ ५ ॥

भीत्यालमङ्गज वसन्त सुराङ्गना वो
  मन्मानसं त्विह जुषध्वमिति ब्रुवाणः।
त्वं विस्मयेन परितः स्तुवतामथैषां
  प्रादर्शयः स्वपरिचारक कातराक्षीः॥ ६ ॥

सम्मोहनाय मिळिता मदनादयन्ते
  त्वद्दासिकापरिमळैः किल मोहमापुः।
दत्तां त्वया च जगृहुस्त्रपयैव सर्व-
  स्वर्वासिगर्वशमनीं पुनरुर्वशीं ताम्॥ ७ ॥

दृष्ट्वोर्वशीं तव कथां च निशम्य शक्रः
  पर्याकुलोऽजनि भवन्महिमावमर्शात्।
एवं प्रशान्तरमणीयतरावतारात्
  त्वत्तोऽधिको वरद कृष्णतनु त्वमेव॥ ८ ॥

दक्षस्तु धातुरतिलाळनया रजोन्धो
  नात्यादृतस्त्वयि च कष्टमशान्तिरासीत्।
येन व्यरुन्ध स भवत्तनुमेव शर्वं
  यज्ञे च वैरपिशुने स्वसुतां व्यमानीत्॥ ९ ॥

क्रुद्धेशमर्दितमख सः तु कृत्तशीर्षो
  देवप्रसादितहरादथ लब्धजीवः।
त्वत्पूरितक्रतुवरः पुनराप शान्तिं
  स त्वं प्रशान्तिकर पाहि मरुत्पुरेश॥ १० ॥

**********